सम्पत्प्रदश्च सर्व्वत्र यतो हि वर्द्धते गृही ।
जम्बूवृक्षश्च दाड़िम्ब: कदल्याम्रातकस्तथा ॥
बन्धुप्रदश्च पूर्व्वस्मिन् दक्षिणे मित्रदस्तथा ।
सर्व्वत्र शुभदश्चैव धनपुत्त्रशुभप्रद: ॥
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ।
ईशाने सुखदश्चैव सर्व्वत्रैवं निशामय ॥
सर्व्वत्र चम्पक: शुद्धो भुवि भद्रप्रदस्तथा ।
अलाबूश्चापि कुष्माण्डो मायाम्बुश्च सुकासुक: ॥
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदा ।
वात्तूक: कारविल्लश्च वार्त्ताकुश्च शुभप्रदा ।
लताफलश्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥”
निषिद्धवृक्षा यथा,—
“प्रशस्तं कथितं कान्ते ! निषिद्धञ्च निशामय ।
वन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च ॥
वटो निषिद्ध: शिविरे नित्यं चौरभयं तत: ।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा ॥
हे कान्ते ! तिन्तिड़ीवृक्षो यत्नात्तं परिवर्ज्जयेत् ।
शरेषु धनहानि: स्यात् प्रजाहानिर्भवेद्ध्रुवम् ॥
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च ।
न निषिद्ध: प्रसिद्धश्च नगरेषु तथा पुरे ॥
वाच्यामतिनिषिद्धश्च प्राज्ञस्तं परिवर्ज्जयेत् ।
खर्ज्जूरश्च वहुश्चैव निषिद्ध: शिविरे तथा ॥
न निषिद्ध: प्रसिद्धश्च ग्रामेषु नगरेषु च ।
वृक्षश्च चणकादीनां धान्यश्च मङ्गलप्रदम् ॥
ग्रामेषु नगरे चापि शिविरे च तथैव च ।
इक्षुवृक्षश्च शुभद: सततं शुभदस्तथा ॥
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रद: ।
कर्पूरी हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा ॥
हरीतकी च शुभदा ग्रामेषु नगरेषु च ।
न वाच्यां भद्रदा नित्यं तथा चामलकी ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अ: ॥
अपि च ।
“अपुत्त्रस्य च पुत्त्रत्वं पादपा इह कुर्व्वते ।
यत्नेनापि च राजेन्द्र ! अश्वत्थारोपणं कुरु ॥
स ते पुत्त्रसहस्राणां कार्य्यमेक: करिष्यति ।
धनी चाश्वत्थवृक्षेण अशोक: शोकनाशन: ॥
प्लक्षो यज्ञप्रद: प्रोक्तो निम्बश्चायुप्रद: स्मृत: ।
जम्बुकी नाकदा प्रोक्ता भार्य्यादा दाड़िमी तथा ॥
दुम्बरो रोगनाशाय पलाशो ब्रह्मदस्तथा ।
अर्कपुष्पारोपकाणां नित्यं तुष्येद्दिवाकर: ॥
श्रीवृक्ष: शङ्करो देव: पाटलायान्तु पार्व्वती ।
शिंशपायामप्सरस: कुन्दे गन्धर्व्वसत्तमा: ॥
विभीतके दासवृद्धिर्व्वकुलो दास्यदस्तथा ।
अपत्यनाशकस्ताली वकुल: कुलवर्द्धन: ॥
वहुभार्य्या नारिकेली द्राक्ष: सर्व्वाङ्गसुन्दर: ।
रतिप्रदा तथा केली केतकी सर्व्वनाशिनी ।
प्रतिष्ठां ते गमिष्यन्ति ये नरा: प्लक्षरोपका: ॥”
इति पाद्मे सृष्टिखण्डे वृक्षारोपणं नाम ९६ अध्याय: ॥ * ॥ अस्य रोपणफलम् ।

यम उवाच ।

“वृक्षगुल्मलतावल्लीत्वक्सारातृणजातय: ।
वर्द्धते वृक्षजातीयास्तासां रोपे फलं शृणु ॥
य: पुमान् रोपयेद्वृक्षान् छायापुष्पफलोपगान् ।
सर्व्वसत्त्वोपभोगाय स याति परमां गतिम् ॥
छायापुष्पोपगांस्त्रिंशत् फलपुष्पद्रुमांस्तथा ।
रोपयित्वा दशाम्रांस्तु नरो न नरकं व्रजेत् ॥
देवदानवगन्धर्व्वा: किन्नरोरगगुह्यका: ।
पशुपक्षिमनुष्याश्च संश्रयन्ति सदा द्रुमान् ॥
पुष्पै: सुरगणा: सर्व्वे फलैश्च पितर: सदा ।
छायया मे मनुष्यास्तु पशुपक्षिमृगास्तथा ॥

पुष्पोपगन्धांश्च फलोपगन्धान्
य: पादपान्रोपयते मनुष्य: ।
सम्पन्नदेशे वरवेश्मवेश्यां
लभेदधिष्ठानवरं स विप्र: ॥

तस्मात् सुवहवो वृक्षा रोप्या: श्रेयोऽभिवाञ्छता ।
पुत्त्रवत् परिपाल्याश्च ते पुत्त्रा धर्म्मत: स्मृता: ॥
किं धर्म्मविमुखैर्म्मर्त्त्यै: केवलं स्वार्थहेतुभि: ।
तरुपुत्त्रा वरं ये तु परार्थैकान्तवृत्तय: ॥
पत्त्रपुष्पफलच्छायामूलवल्कलदारुभि: ।
परेषामुपकुर्व्वन्ति तारयन्ति पितामहान् ॥
छेत्तारमपि संप्राप्तं छायापुष्पफलादिभि: ।
पूजयन्त्येव तरवो मुनिवद्द्वेषवर्जिता: ॥
पितरं नोपहिंसन्ति द्रुमा द्रविणलोभत: ।
तारयन्ति च मे सम्यक् सर्व्वस्वातिथ्यदायका: ॥
तस्मात्ते पुत्त्रवत् स्थाप्या विधिवद्द्विजपुङ्गव ।
द्विजै: पितृमनुष्याणामभोग्या: स्युर्यदा सदा ॥
जलकृत् वृक्षरोपी य: प्रतिग्राहाच्च्युतो द्विज: ।
एते स्वर्गान्न हीयन्ते ये चान्ये सत्यवादिन: ॥”
इत्याद्ये वह्निपुराणे तड़ागवृक्षप्रशंसानामाध्याय: ॥ * ॥ अपि च ।
“भूमिदानेन ये लोका गोदानेन च कीर्त्तिता: ।
ते लोका: प्राप्यते पुंभि: पादपानां प्ररोहणे ॥

अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश पुष्पजाती: ।
द्वे द्वे तथा दाड़िममातुलुङ्गे
पञ्चाम्ररोपी नरकं न याति ॥
यथा सुपुत्त्र: कुलमुद्धरेद्धि
यथाग्निहोत्रात्तनियमप्रयत्नात् ।
तथात्र वृक्षा: फलपुष्पभूता:
स्वं स्वामिनं नरकादुद्धरन्ति ॥

गोकर्ण उवाच ।

इन्धनार्थं यथा नीतमग्निहोत्रं तदुच्यते ॥
छायाविश्रामपथिकै: पक्षिणां निलयेन च ।
पत्त्रमूलत्वगाद्यैश्च औषधार्थन्तु देहिनाम् ॥
उपकुर्व्वन्ति वृक्षस्य पञ्चयज्ञ: स उच्यते ।
गृहकृत्यानि काष्ठानि क्षुद्रजन्तुगृहास्तथा ॥
यज्ञनिर्व्वर्त्तनं प्रोक्तं भिक्षा पत्रै: समाहृता ।
फलन्ति वत्सरे मध्ये द्विवारं शाकुनादय: ॥
सांवत्सरं पितुर्मातुरुपकारं फलै: कृतम् ।
एवं पुत्त्र समारोप्या एवं तत्त्वविदो विदु: ॥”
इत्यादि वाराहपुराणे गोकर्णमाहात्म्यनामाध्याय: ॥ * ॥ अच्छेद्यवृक्षा यथा,—
“अश्वत्थो वटवृक्षश्च न च्छेत्तव्य: कदाचन ।
न च्छेत्तव्यो बिल्ववृक्ष उडुम्बरश्च कदाचन ।
कर्म्मण्याश्चैव ये वृक्षा न च्छेत्तव्या: कदाचन ॥”
इति च वाराहपुराणे माक्षणदीयासूत्रं नामाध्याय: ॥ * ॥ वृक्षोत्पाता यथा,—
“पुरेषु येषु दृश्यन्ते पादपाश्चैव रोदिता: ।
रुदन्तो वा हसन्तो वा स्रवन्तो वा वहून्रसान् ॥
अरोगा वा विना वातं शाखा मुञ्चन्त्यथ द्रुमा: ।
फलं पुष्पं तथा काले दर्शयन्ति दिहायना: ॥
पूर्व्वावस्थां दर्शयन्ति फलं पुष्पं तथा भवेत् ।
क्षीरं स्नेहं मदं रक्तं मधु तोयं स्रवन्ति च ॥
शुष्यन्त्यरोगा: सहसा शुष्का रोहन्ति वा पुन: ।
उत्तिष्ठन्तीह पतिता: पतन्ति च तथोन्नता: ॥
एवं वक्ष्यामि ते ब्रह्मन् विपाकफलमेव च ।
रोदने व्याधिमभ्येति हसने देशविभ्रमम् ॥
शाखाप्रपतने कुर्य्यात् संग्रामे योधपातनम् ।
बालानां मरणं कुर्य्याद्बालानां फलपुष्पिता ॥
स्वराष्ट्रभेदं कुरुते फलपुष्पमनन्तरम् ।
क्षयं सर्व्वत्र गोक्षीरे स्नेहे दुर्भिक्षलक्षणम् ॥
वाहनापचयं मद्ये रक्तं संग्राममादिशेत् ।
मधुस्रावे भवेद्व्याधिर्जलस्रावे न वर्षति ॥
अरोगं शोषणं ज्ञेयं ब्रह्मन् दुर्भिक्षलक्षणम् ।
शुष्केषु संप्ररोहस्तु वीर्य्यमन्नश्च हीयते ॥
उत्थाने पतितानाञ्च भयभेदकरं भवेत् ।
स्थानात् स्थानन्तु गमने देशभङ्गन्तथादिशेत् ॥
ज्वलत्स्वपि च वृक्षेषु रोदत्सु च धनक्षयम् ।
एतत् पूजितवृक्षेषु सर्व्वं राज्ञो विपद्यते ॥
पुष्पे फले वा विकृते राज्ञो मृत्युं तथादिशेत् ।
अन्येषु दैवयुक्तेषु वृक्षोत्पातेषु मन्त्रित: ॥
आच्छादयित्वा तं वृक्षं गन्धमाल्यैर्विभूषयेत् ।
वृक्षोपरि तथा छत्त्रं कुर्य्यात् पापप्रशान्तये ॥
शिवमभ्यर्च्चयेद्देवं पशुञ्चास्मै निवेदयेत् ।
मूलेभ्य इति यद्धोमा हुत्वा रुद्रं जपेत्तथा ॥

मध्वाज्ययुक्तेन तु पायसेन
संपूज्य विप्रांश्चतुरश्च दद्यात् ।
गीतेन नृत्येन तथार्च्चनेन
देवं हरं पापविनाशहेतो: ॥”

इति मात्स्ये अद्भुतशान्तिवृक्षोत्पातप्रशमनं नाम २०६ अध्याय: ॥ * ॥ अथ वृक्षप्रतिष्ठा ।

भीष्म उवाच ।

“पादपानां विधिं ब्रह्मन् यथावद्विस्तराद्वद ।
विधिना येन कर्त्तव्यं पादपोद्यापनं बुधै: ।
ये च लोका: स्मृतास्तेषां तानि चैव वदस्व मे ॥

पुलस्त्य उवाच ।

पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु ।
तड़ागविधिवत् सर्व्वं समाप्तिं जगदीश्वर ॥
कृत्वा मण्डपसंभारं स्नात्वा प्रयतमानस: ।
पूजयेद्ब्राह्मणं तद्वद्धेमवस्त्रानुलेपनै: ॥
सर्व्वौषध्युदकै: सिक्तान्नानापुष्पविभूषितान् ।
वृक्षान्माल्यैरलंकृत्य वासोभिरभिवेष्टयेत् ।
सूच्या चैव तथा कार्य्यं सर्व्वेषां कर्णवेधनम् ।